# संस्कृत

## प्रथम प्रश्न-पत्र ( भारतीय धर्म दर्शनं च )

**Time allowed : Three hours** **Maximum Marks : 100**

1. निम्नङ्कितेषु कयोश्चिद् द्वयोः सप्रसङ्ग व्याख्या करणीया–

(क) द्रव्य–गुण–कर्म–सामान्य–विशेष–समवायाभावाः सप्त पदार्थाः।

(ख) उष्णस्पर्शवत्तेजः। तच्च द्विविधं नित्यमनित्यञ्च। नित्यंपरमाणु रूपम्। अनित्यं कार्यरूपम्। पुनस्त्रिविधं–शरीरेन्द्रियविषयभेदात्।

(ग) ज्ञानाधिकरणमात्मा। स द्विविधो–जीवात्मा परमात्मा च। तत्रेश्वरः सर्वज्ञः परमात्मा एक एव। जीवस्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च।

2. अधोलिखितेषु केषाञ्चन् पञ्चप्रश्नानां उत्तराणि संस्कृत माध्यमेन देयानि–

(क) के नवद्रव्यामि ? (ख) जलस्य लक्षणं किम् ?

(ग) कर्माणि कियन्ति, कानि च तानि ? (घ) प्रत्यक्षस्यं लक्षणं किम् ?

(ङ) पृथिव्या लक्षणं किम् ? कति च भेदा ? (च) दिश लक्षणं किम् ? सा कतिविधा ?

(छ) सामान्य कतिविधम् के च ले ? (ज) बुद्धेर्लक्षणं किम् ?

(झ) करणस्य लक्षणं किम् ? (ञ) मनसः लक्षणं किम् ?

3. अधोलिखितयोः द्वयोः श्लोकयो ससन्दर्भ व्याख्या करणीया–

(क) देहिनोऽस्मिन्यथा देहे कौमार यौवन जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति।।

(ख) य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्।
उभौ तो न विजानीतो नायं हन्ति न हन्यते।।

(ग) विहाय कामान् यः सर्वान्पुमाश्चरति निःस्पृह।
निर्गमो निरहंकार स शान्तिमधिमगच्छति।।

(घ) इन्द्रियाणा हि चरता यन्मनोऽनुविधीयते।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि।।

4. अधोलिखितेषु केषाञ्चन् पञ्चप्रश्नानामुत्तराणि संस्कृतमाध्यमेन देयानि–

(क) कामात् कि भवति ? (ख) कस्य भाव न विद्यते ?

(ग) कस्य अभाव न विद्यते ? (घ) गुडाकेशः कस्य विशेषणमस्ति ?

(ङ) स्थित धीः कः ? (च) आत्मान कि न दहति ?

Scanned by CamScanner

(छ) स्थितप्रज्ञः कदा उच्यते ? (ज) कर्मसु कौशल किमुच्यते ?
(झ) कस्य धर्मस्य स्वल्पमपि महंतः भयात् त्रायते ?
(ञ) शरीरे हन्यमाने अपि किं न हन्यते ?

5. अधोलिखितेषु सूत्रेषु व्यासभाष्यमाघृत्स सूत्रद्वयस्य व्याख्या कार्या–
(क) प्रत्यक्षानुमानागमा प्रमाणानि। (ख) अभावप्रत्ययालम्बना वृत्तिर्निद्रा।
(ग) अभ्यासवैराग्याभ्यां तन्निरोध। (घ) भवप्रत्ययो विदेहप्रकृतिलयानाम्।
(ङ) तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी।

6. अधोलिखितेषु पञ्चप्रश्नानामुत्तराणि देयानि–
(क) का पञ्चवृत्तयः ? (ख) विपर्य्ययो किम् ?
(ग) सम्प्रज्ञात समधिः का कथ्यते ? (घ) कः ईश्वर ?
(ङ) ईश्वरस्य वाचकः कः ? (च) सवितर्का समापत्ति का कथ्यते ?
(छ) सबीजः समाधिः का ? (ज) निर्बीज समाधिः का ?
(झ) योगस्य किं लक्षणम् ? (ञ) तत्र स्थितौ यत्नो किमुच्यते ?

7. अधोलिखितेषु त्रयाणां श्लोकानां सप्रसङ्ग व्याख्याकरणीया–
(क) वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च।।
(ख) ब्रह्मवर्चसकामस्य कार्थ विप्रस्य पञ्चमे।
राज्ञो बलार्थिन षष्ठे वैश्यस्येहार्थिनोऽष्टमे ।।
(ग) नैतैरपूतैर्विधिवदापद्यपि हि कर्हचित्।
ब्राह्मान्यौनाश्च सम्बन्धानाचरेद् ब्राह्मण सह।।
(घ) आयुष्यं प्राङ्मुखोभुङ्क्ते यशस्यं दक्षिणामुख।
श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते ह्युदङमुख।।
(ङ) त्रिराचामेदपः पूर्व द्विः प्रभृज्यात्ततोमुखम्।
खानि चैव स्पृशेदद्भिरात्मानं शिर एव च।।
(च) विद्या ब्राह्माणमेत्याह शेवधिस्तेऽस्मि रक्षमाम्।
असूयकाय मां मादास्तथास्यां वीर्यवत्तमा।।

8. अधोलिखितानां केषाञ्चन् पञ्चप्रश्नानामुत्तराणि देयानि–
(क) महर्षिमनोः रचना का अस्ति ? (ख) इह कस्य काचिद् क्रिया न दृश्यते ?
(ग) मनुस्मृतेरनुसार नास्तिक क ? (घ) साक्षात् धर्मस्य लक्षणं किम् ?
(ङ) धर्मजिज्ञासमानानां किं परमप्रमाणम् ? (च) राज्ञः उपनयनं कस्मिन् वर्षे कुर्यात् ?
(छ) ब्राह्मणस्य मेखला कया कार्या ? (ज) अङ्गुष्ठमूलस्य तले कः तीर्थ प्रचक्षते ?
(झ) कस्य आयुर्विधा यशो बल वर्धन्ते ? (ञ) शूद्रोऽपि कः मानार्हः भवति ?

questionpaperesult.com

Scanned by CamScanner